यत्राम्भोजासना रुद्रगाः जलधरस्ति धरो नृहरिं पं
केरुहस्याः सोमासाविष्णुपेताः रणचर
पिनाकायुं कारणस्यादिव्याविनाष्ट
नेत्राः जगत्प्रन स्थिति नुदनोत्पादिद्दताः
श्रीता वः पांतु नित्यं हरिहरविधयः तत्त्वेऽसौ १
इं पत्राः १

श्रीमते रामानुजाय नमः श्रीवासुदेवं नवनीरदाभं माधवं कृतपार्श्वभागं मत्स्यादिरूपैः कृतलोकतोषं विघ्नानि
हानं प्रणमं नमामि १ अक्षपादं मुनिं नत्वा कणादं च ततः परं लोकाक्षिणामाऽल्पकरेण तन्यते तर्ककौमुदी २ तत्राभि
धेयाः पदार्थाः ते च द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्तैव द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगा
त्ममनांसि नवैव गुणास्तु रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वाऽपरत्वबुद्धिसुखदुःखेच्छाद्वेष
प्रयत्नगुरुत्वद्रवत्वस्नेहसंस्कारधर्माऽधर्मशब्दाश्चतुर्विंशतिरेव कर्माण्युत्क्षेपणाऽपक्षेपणाऽऽकुञ्चनप्रसारण
गमनानि पञ्चैव सामान्यं द्विविधं परमपरं च नित्यद्रव्यवृत्तयो विशेषास्त्वनन्ता एव समवायस्त्वेक एव अ
भावो द्विविधः संसर्गाभावोऽन्योन्याभावश्चेति द्रव्यत्वसामान्यवत्त्वं गुणवत्त्वं वा द्रव्यं द्रव्यगुणान्यत्वसामान्यवान् द्रव्यक
र्मभिन्नः सामान्यवान् वा गुणः कर्मत्वसामान्यवत् चलनात्मकं वा कर्म नित्यमेकमनेकसमवेतं सामान्यं अयथमसा
मान्यवृत्ताऽस्ति व्यावृत्तिबुद्धिमात्रहेतुर्विशेषः नित्यसम्बन्धः समवायः भावभिन्नोऽभावः इति द्रव्यादिसामान्यलक्षणानि
अथ विशेषलक्षणान्युच्यन्ते पृथिवीत्वसामान्यवती गन्धवती पृथिवी रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभाग
परत्वापरत्वगुरुत्वद्रवत्वसंस्कारात्मकचतुर्दशगुणवती सा द्विधा नित्याऽनित्या च नित्या परमाणुलक्षणा अनित्या
कार्यलक्षणा सापि त्रिविधा शरीरेन्द्रियविषयभेदात् शरीरमपि द्विविधं योनिजमयोनिजं च तत्र शुक्रशोणितसन्निपा
तजं योनिजमस्मदादीनां अयोनिजं सिद्ध शुक्रशोणितसन्निपातं विना धर्मविशेषसहकृतपरमाणुभ्य एव जा
तजं देवर्षिनारदादीनां इन्द्रियं गन्धग्राहकं घ्राणं नासाग्रवर्ति विषयोऽस्माकं पाषाणाद्यावत् ते त्रिविधः सत्याधारो

नै॰
त॰
टी॰

पि सा

नां संयोगात् त्र्यणुकं चतुर्णां त्र्यणुकानां संयोगात् चतुरणुकमेवं पंचाणुकादिक्रमेणायतनमंत्यावयवि शरीरं सु
खदुःखान्यतरसाक्षात्कारो भोगः द्रव्यानारंभकं कार्यद्रव्यमंत्यावयवि शरीरं संयुक्तं ज्ञानकरणमतींद्रियमिंद्रियं ज्ञा
यमानत्वे सति भोगसाधनं विषय इति शब्दगुणकमाकाशं शब्दः संख्यापरिमाणपृथक्त्वसंयोगविभाग
गुणाष्टकवान् स च लाघवादेकः सर्वत्र कार्योपलंभात् विभुर्विभुत्वाच्च नित्यः तदुपाधिकर्णशष्कुल्यवच्छिन्नः स
शब्दग्राहकं श्रोत्रेंद्रियात्मकः ज्येष्ठत्वकनिष्ठत्वज्ञानाधीनपरत्वापरत्वानुमेयः कालः संख्यापरिमाणपृथक्त्वसंयोग
विभागगुणपंचकवान् सोप्येको विभुर्नित्यश्च तत्तदुपाधिभेदात् त्रिविधः अतीतानागतो वर्तमानश्चेति तद्घटध्वं
सविशिष्टः कालस्तद्घटेतीतकालः तद्घटप्रागभावविशिष्टः कालस्तद्घटेनागतकालः तद्घटध्वंसप्रागभावा
नवच्छिन्नः कालस्तद्घटे वर्तमानकालः दूरत्वसन्निहितत्वज्ञानाधीनपरत्वापरत्वानुमेया दिक् संख्यापरिमाण
पृथक्त्वसंयोगविभागगुणपंचकवती सोप्येका विभ्वी नित्या च तत्तदुपाधिभेदाच्चतुर्विधा प्राची प्रतीची अवाची
उदीची दक्षिणा चेति उदयाचलसन्निहिता दिक् प्राची अस्ताचलसन्निहिता दिक् प्रतीची सुमेरुसन्निहिता दिक् उदीची
सुमेरुव्यवहिता दिक् दक्षिणा आत्मत्वसामान्यवानात्मा स द्विविधः जीवेश्वरभेदात् अनित्यज्ञानादिमान् जी
वः संख्यापरिमाणपृथक्त्वसंयोगविभागबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारगुणचतुर्दशवान् स च सु
खदुःखादिवैचित्र्यात् प्रतिशरीरं भिन्नः नित्यज्ञानादिमानीश्वरः संख्यापरिमाणपृथक्त्वसंयोगविभागबुद्धि
प्रयत्नगुणाष्टकवान् स चैक एवाशरीरः सहितश्च शरीराद्यभावात् यद्यसावपि शरीरी पुरुषादिवत् कार्तो
शरीरस्यैवास्मदीयादृष्टेन तच्छरीरस्य जननं संभवात् नास्मदीयादृष्टेन मुक्तस्यापि शरीरोत्पादः स्यादिति वाच्य

2 राम 2

प्रसिद्धा। स्थावरास्तु वृक्षलतादिः अप्त्वसामान्यवत्य आपः रूपरससस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापर
त्वगुरुत्वद्रवत्वस्नेहसंस्कारात्मकचतुर्दशगुणवत्यः ताश्च द्विविधा नित्याः नित्याश्चेति नित्याः परमाणुलक्षणा
ः अनित्याः कार्यलक्षणाः ताः त्रिविधाः शरीरेन्द्रियविषयभेदात् शरीरमयोनिजमेव वरुणलोके प्रसिद्धं इन्द्रियं रसग्रा
हकं रसनं रसनाग्रवर्ति विषयः सरित्समुद्रहिमकरकादिः तेजस्त्वसामान्यवत्तेजः रूपस्पर्शसंख्यापरि
माणपृथक्त्वसंयोगविभागपरत्वापरत्वसंस्कारात्मकैकादशगुणवत् तत् द्विविधं नित्यमनित्यं च नित्यं परमाणुल
क्षणं अनित्यं कार्यलक्षणं तदपि त्रिविधं शरीरेन्द्रियविषयभेदात् शरीरमयोनिजमेवादित्यलोके प्रसिद्धं इन्द्रियं
९ रूपग्राहकं चक्षुः कृष्णताराग्रवर्ति विषयलक्षणं तेजश्चतुर्विधं भौमदिव्यौदर्याकरजभेदात् पार्थिवेन्धनप्रभ
३ दि भौमं अविन्धनं दिव्यं विद्युदादि भुक्तस्य परिणामहेतुरौदर्यं सुवर्णादि आकरजं वायु
त्वसामान्यवान्वायुः स्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वसंस्कारात्मकगुणनवकवान् स द्विविधः
नित्योनित्यश्च नित्यः परमाणुलक्षणः अनित्यः कार्यलक्षणः अनित्यश्चतुर्विधः शरीरेन्द्रियविषयप्राणभेदात् शरीरम
योनिजमेव वायुलोके प्रसिद्धं इन्द्रियं स्पर्शग्राहकं सर्वशरीरव्यापि त्वक् विषयो महावातादिः शरीरान्तःसंचारी वायुः
प्राणः हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः उदानः कण्ठदेशस्थो व्यानः सर्वशरीरगः स एव क्रियाभेदात्प्राणव्या
नोदानसमानसंज्ञां लभते नन्तु शरीरे पंच मरुतो नाम समानरूपता विरोधात् मूर्तत्वे सति निरवयवः परमाणुः स
चातीन्द्रिय एव तदुक्तं जालान्तरस्थसूर्यांशौ यत्सूक्ष्मं दृश्यते रजः भागस्तस्य च षष्ठो यः परमाणुः स उच्यते इति का ९
र्यद्रव्यारम्भे द्व्यणुकत्र्यणुकादिभेदेनानेकविधं तत्र द्वयोः परमाण्वोः संयोगाद्व्यणुकं त्रयाणां द्व्यणुकानां

॥

मेव व्यवहारासाधारणं कारणं परिमाणं तच्चतुर्विधं अणु ह्रस्वं महद्दीर्घं चेति अणुह्रस्वपरिमाणे
परमाणुद्व्यणुकयोः महद्दीर्घपरिमाणे त्र्यणुकचतुरणुकादौ तदुभयमपि द्विविधं नित्यमनित्यं च नि
त्यगतं नित्यं अनित्यगतमनित्यं तच्च त्रिविधं संख्याजन्यं परिमाणजन्यं प्रचयजन्यं चेति तत्र द्व्यणुकपरि
माणं परमाणुद्वित्वसंख्याजन्यं त्र्यणुकपरिमाणं द्व्यणुकत्रित्वसंख्याजन्यं तत्रावयवगतादणुपरि
माणस्यासमवायित्वे तस्य भावात्तरत्वप्रसंगात् परिमाणस्य स्वसमानजातीयोत्कृष्टजनकत्वनि
यमात् चतुरणुकादिपरिमाणं परिमाणजन्यं अवयवगतमहत्त्वस्यैव तत्रासमवायित्वात् तू
लपिंडपरिमाणं प्रचयजन्यं अवयवानां प्रशिथिलः संयोगः प्रचयस्तस्यैव तत्रासमवायित्वात् पृथग्व्य
वहारासाधारणं कारणं पृथक्त्वं तदपि द्विविधं एकानेकवृत्तिभेदात् तत्रैकपृथक्त्वं मेकवृत्ति इत्येव
नित्यगतमनित्यं द्विपृथक्त्वाद्यनेकवृत्ति तच्चानेकपृथक्त्वं द्वित्ववदपेक्षाबुद्धिजन्यं तन्नाशनाश्य
संयुक्तव्यवहारासाधारणं कारणं संयोगः स द्विविधः कर्मजः संयोगजश्च कर्मजोऽपि द्विविधः अन्यतरकर्मजः
उभयकर्मजश्च आद्यः श्येनशैलयोः द्वितीयस्तु मेषयोर्मल्लयोर्वा हस्ततरुसंयोगात्कायतरुसंयोगः सं
योगजः विभक्तव्यवहारासाधारणं कारणं विभागः सोऽपि द्विविधः कर्मजो विभागजश्चेति कर्मजोऽपि
द्विविधः अन्यतरकर्मजः उभयकर्मजश्चेति आद्यः श्येनशैलयोः द्वितीयस्तु मेषयोर्मल्लयोर्वा
हस्ततरुविभागात्कायतरुविभागो विभागजः संख्यादयः पंच सर्वद्रव्यवृत्तयः परव्यवहारासाधारणं
कारणं परत्वं अपरव्यवहारासाधारणं कारणमपरत्वं ते द्विविधे कालकृते दिक्कृते चेति
कालकृते ग्रामप्रदेशे [illegible] तदवधिकं परत्वं कालकृतं
२१ पूर्वदेह्या ज्येष्ठत्वतदवधिकं परत्वं कालकृतं

व गं वी

शरीरहेतोरिच्छादेस्तत्राभावात् अतः स्वचतुर्भुजत्वादि ... संगच्छते द्विविधोप्यात्मा विभुर्नित्यः ... सामान्यवान्

[illegible] नः संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वसंस्कारगुणाः एकव

त्तत्रैव संख्यापृथक्त्वं ... नैमित्तिकं प्रतिजीवं भिन्नं अणुनित्यं चेति द्रव्यविशेषलक्षणानि अथ गु कृष्ण

णविशेषलक्षणानि उच्यन्ते चक्षुर्मात्रग्राह्यजातिमान् गुणो रूपं शुक्लादि भेदात् ... शुक्लं रक्तं हरितं कपि पीत

लभेदात् षड्विधं शुक्लादिषट्कं पृथिव्यामेव शुक्लं त्वभास्वरं जले शुक्लं भास्वरं तेजसि रसनामात्रग्राह्यजातिमान्

दि रसः स च मधुराम्ललवणकटुकषायतिक्तभेदात् षड्विधः षडपि पृथिव्यामेव मधुरस्तु जले घ्राण

मात्रग्राह्यजातिमान् गन्धः स द्विविधः सुरभिरसुरभिश्च द्विविधोपि गन्धः पृथिव्यामेव त्वङ्मात्रग्राह्यजातिमान् ३

स्पर्शः शीतोष्णानुष्णाशीतभेदात् शीतो जले उष्णस्तेजसि अनुष्णाशीतः पृथिवीवाय्वोः द्विविधा यापि

पृथिव्यादिरूपादयः पाकजा अपाकजाश्च तत्र हि तेजःसंयोगात्पूर्वरूपादिनाशे ... रूपाद्युत्पादः

... तेजःपिण्डे रूपादिनाशकरूपाद्युत्पादकः परमाणौ एवेति वैशेषिकमतं ... यदि

न्यपीति नैयायिकाः जलतेजोवायुषु त्वनित्यगताः रूपादयो नित्याः अनित्यगताश्चानित्याः उद्भूतानुद्भूतभे

दाद्रूपादयश्च नानाविधाः घ्राणरसनचक्षुस्त्वचामुद्भूताः उद्भूतास्तु पृथिव्यां घटादौ ... परमाणु

घणुकद्व्यणुकादौ चित्राविचित्रभेदेन ... द्विविधाः ... नीलपीतादिमधुरतिक्तादि ...

दिमृदुकुमारकाठिनादि ... विज्ञाः ... नानाव्यवहारासाधारणं कारणं संख्या

वि सा द्विविधा एकानेकविषयभेदात् तत्रैकत्वमेकवृत्ति तच्च नित्यगतं नित्यं अनित्यगतमनित्यं द्वित्वादिकमनेकवृत्ति

तच्चानेकत्वविषयापेक्षाबुद्धिजन्यं तन्नाशनाश्यं चेत्यनित्यमेव परमाणुघणुकमात्र ... नानैकत्व

नानैकत्वविषया ... दाः ... अपेक्षाबुद्धिनाशनाश्यं ...

६

घटंप्रत्यकारणान्यथासिद्धः एवं कुलालपितुरपि कुलालपितृत्वेन घटंप्रति पूर्ववृत्तित्वं ग्राह्यं कुलालपितृत्वंच
कुलालजनकत्वं तच्च कुलालनियतपूर्ववृत्तित्वघटितं तथाच कुलालप्रतिपूर्ववृत्तित्वे ज्ञाते एव घटंप्रति
पूर्ववृत्तित्वग्रहात् घटंप्रति कुलालपितान्यथासिद्धः अन्यत्र क्लृप्तनियतपूर्ववृत्तिन एव कार्यसंभवे तत्सहभूतत्वमन्य
थासिद्धत्वं यथा घटविशेषं प्रति दैवात्समागतरासभस्य घटविशेषादन्यत्र घटांतरे क्लृप्तनियतपूर्ववृत्तिदंडचक्रा
देरेव घटविशेषस्यापि संभवे दंडचक्रादिसहभूतो दैवादागतरासभोऽन्यथासिद्धः रासभसामान्यस्य घटसामान्य
प्रति हेतुत्ववारणाय नियतपूर्ववृत्तीत्यत्र नियतपदं तत्रापि चान्यथासिद्धत्वाभावात् नहि घटसामान्यं प्रति रास
भः क्लृप्तनियतपूर्ववृत्तितेन वेमादेर्घटसामान्यस्य संभवेन येन रासभस्यान्यथासिद्धिः स्यात् नियतपूर्ववृत्तित्वं च
अव्यवहितपूर्वकालावच्छेदेन कार्यदेशे सत्त्वं नवेदं रासभसामान्ये त्वतो नातिव्याप्तिरिति संक्षेपः तच्च कारणं
त्रिविधं समवाय्यसमवायिनिमित्तभेदात् तत्र यत्समवेतं कार्यं तत्समवायिकारणं यथा तन्तवः पटस्य कपालानि
घटस्य पटघटादिः स्वगतरूपादेः समवायिकारणप्रत्यासन्नं कारणमसमवायिकारणं यथा तन्तुसंयोगः
पटस्य तस्य पटसमवायिकारणेषु तन्तुषु समवेतत्वेन प्रत्यासन्नत्वात्कारणत्वाच्च समवाय्यसमवायिकार
णातिरिक्तकारणं तु निमित्तकारणं यथा तुरीवेमादिकं पटस्य दंडचक्रादिर्घटस्य प्रमाणं द्विविधं प्रत्यक्षा
नुमानभेदात् शब्दादेरनुमानविधयैव प्रमाणत्वमिति वैशेषिकमतं चतुर्विधमिति नैयायिकाः [illegible]
त्यक्षानुमानोपमानशब्दाः प्रमाणानीति प्रत्यक्षप्रमाकरणं प्रत्यक्षं तच्चेन्द्रियात्मकं इंद्रियार्थसंनि
कर्षजन्यं ज्ञानं प्रत्यक्षं तच्च द्विविधं सविकल्पकनिर्विकल्पकभेदात् विशेषणविशेष्यसंबंधावगाहि
प्रत्यक्षं सविकल्पकं तथा [illegible] विशेषणविशेष्यसंबंधानवगाहि प्रत्यक्षं निर्विकल्पकं

आत्मकालसंयोगः समवायी ज्येष्ठत्वकनिष्ठत्वज्ञानं निमित्तं तन्नाशकं तन्नाशनिमित्तं एतेऽनित्यद्रव्य एवोत्पद्ये
परत्वे तयाद्दूरस्थस्तत्तदवधिकपरत्वे दिक्कृते योपदेशेनपासान्येति तत्तत्तदवधिकमपरत्वे दिक्कृते आत्मा
कपिण्डसंयोगः समवायी दूरत्वसमीपत्वज्ञानं निमित्तं तन्नाशकं तन्नाशनिमित्तं एतेऽनित्य एव बुद्धिस्वरूपमा
नैवती अर्थप्रकाशिका बुद्धिः सा द्विविधा स्मृतिरनुभवश्च संस्कारजन्यज्ञानं स्मृतिः यथा सामग्रीकार्यका
लविषयं स्मरणमित्यादि तत्र पूर्वानुभवः कारणं संस्कारो व्यापारः नवस्तोपदेस्वदतेऽनित्यस्मृतिज्ञानमिति स्मृ
तिः त्वं संस्कारजनितत्वं नाशस्मृतिस्वहेतुत्वं संस्कारोपीत्यतिव्याप्तिविरहात् स्मृतिभिन्नं ज्ञानमनुभ
वत्वजातिमान्वानुभवः स द्विविधः प्रमाप्रमाभेदात् प्रमाणाभासजन्यो यथार्थोऽनुभवः प्रमा सा विद्या भ्रमसंशय
भेदात् विपरीतनिश्चयो भ्रमः यथा पीतः शंखः लोहितः स्फटिकः एकस्मिन्धर्मिणि विरुद्धनानाकोटिकं ज्ञानं संशयः
यथा वेति नीरुश्चेतरे स्थाणुर्वा पुरुषो वेति यथार्थानुभवः प्रमा फलवत्प्रवृत्तिजननयोग्यत्वं वा यथार्थत्वं स्म
तानुभवसाधारणं प्रमाकरणं प्रमाणं व्यापारवत्कारणं करणं यथा छिदिक्रियायां कुठारः तज्जन्यत्वे सति तज्जन्यजनको
व्यापारः यथा कुठारदारुसंयोगः अनन्यथासिद्धनियतपूर्ववर्ति कारणं यथा तन्त्वादिकं पटस्य कपालादिकं घटस्य
अन्यथासिद्धश्चानन्यथासिद्धः अन्यथासिद्धिस्त्रिविधा येन सहैव यस्य यं प्रति पूर्वभावोऽवगम्यते तेन तस्य
तं प्रत्यन्यथासिद्धिः यथा यथा घटं प्रति दण्डेन दण्डरूपस्य दण्डत्वस्य च दण्डेन सहैव दण्डरूपस्य दण्डत्वस्य वा घटं प्रति पूर्वभाव
ग्राहात् अन्यं प्रति पूर्ववृत्तित्वे ज्ञात एव यस्य यं प्रति पूर्ववृत्तित्वं गृह्यते तस्य तं प्रत्यन्यथासिद्धिः द्वितीया यथा घटं प्र
ति आकाशस्य शब्दं प्रति जनकत्वेन आकाशस्य आकाशत्वेन घटं प्रति पूर्ववृत्तित्वग्रहः आकाशत्वं च समवा
यिकारणत्वं तच्च शब्दं प्रति तत्पूर्ववर्तिनियतपूर्ववर्तिनः तथा च घटं प्रति पूर्ववृत्तित्वे ज्ञात एव घटं प्रति पूर्ववृत्तित्वे

रसनं रूपप्रत्यक्षतासाधारणं कारणं चक्षुः स्पर्शप्रत्यक्षतासाधारणं कारणं त्वक् शब्दप्रत्यक्षतासाधारणं कारणं श्रो

५ तथाहिघटौभितत्तन्यवर्थानांप्रत्यक्षजन्यो कथमन्यथाकश्चिकाध्यम् नमः तत्र पदार्थासंकर्षज्ञानं एवंसुरभिचंदनमितिचाक्षुषे
मा भस्यापिभानज्ञानमानिकवैशाली रथस्यचक्षुर्योग्यत्वेन चक्षुःसंयुक्तसमवायस्यतत्रसत्वेप्यप्रयोजकत्वात् योग
क्षमैजसान्निकर्षस्यत्वयोग्यत्वात् वस्तुमात्रस्यप्रत्यक्षजन्यो नस्यप्रत्यक्षत्वप्रसंगात् घ्राणासमानत्वादेकत्वेन मनोभेदात् गंधप्रत्यक्षतासाधार
णं कारणं घ्राणं रसनप्रत्यक्षतासाधारणं कारणंरसनं सुरभ्यादिप्रत्यक्षतासाधारणं कारणं मनः घ्राणादि लक्षणे साधारणोपलक्षणत्वादि वारणा
य गंधादिग्रहणे इत्येवं दत्ते सौरभ्य गुडमधुरोरसः घटे लौहितः जलेशीतस्पर्शः वनेसिंहनादः मयि सुखमिसाधाकारके त नुक्ता
रतीमनस्यघ्राणादेःव्यापारे घ्राणादिमनःसंयोगः मनस्त्वात्मसंयोगः नचघ्राणादेर्गंधादिप्रत्यक्षजनकत्वे परमाणुमेव्यादिगंधादे
रपिप्रत्यक्षत्वापत्तिरिति वाच्यं यतो गंधादयो महत्त्वसमानाधिकरणा एव घ्राणादिग्राह्याः परमाणौ गंधादयस्तु न महत्त्वसमाना
धिकरणाः मन्द्यादिगंधादयस्तु नोद्भूताः तेन न प्रसंगः एवं मेर्यादिषु शब्दादीनां तज्जन्यापेक्षकत्वं गंधस्य नाप्रसंगः
शतमन्तः शब्दः श्रोत्रयोग्यः तस्यैवश्रोत्रसंबंधसमवायात् अत्र घ्राणरसनश्रोत्राणि द्रव्याग्राहकाणि चक्षुस्त्वचौ तु द्रव्यग्राह
काणि महत्त्वोद्भूतरूपवत् द्रव्यंचक्षुर्योग्यं एवंमहत्त्वोद्भूतस्पर्शवद्द्रव्यं त्वचो योग्यं अत एव परमाणुवायुपिशाचादयोऽनुद्भूत
स्पर्शो न गृह्यते परमाणौ महत्त्वाभावात् वायौ रूपाभावात् पिशाचादौ तु उद्भूतरूपाभावात् अत एव सूर्यापि त्वचा न गृह्यते
तत्र उद्भूतस्पर्शाभावात् स्वयोग्यद्रव्यसमवेताः द्रव्यत्वादिसामान्यकर्मसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्व
६ द्रवत्वस्नेहवेगाः तत्समवायात्तदभावश्चाक्षुषत्वाचोपि योग्याः जीवात्मन्युद्भूतगुणाः मनोयोग्याः तत्समवेताः आत्मत्वादिसामान्यं बुद्धि
सुखदुःखेच्छाद्वेषप्रयत्नाः तत्समवायात् तदभावश्च मनोयोग्याः येनेंद्रियेण यद् गृह्यते तेनैवेंद्रियेण तद्गता जातिः तत्समवायस्तदभाव एम
श्च गृह्यते इति नियमादिति व्याख्यानप्रत्यक्षप्रमाणमभिरूप्यते अनुमितिकरणमनुमानं नेत्रेषु धूमादिवह्निव्याप्यद्रिति ५
व्याप्तिज्ञानं वह्निव्याप्यधूमवान् पर्वत इति तृतीयलिंगपरामर्शो व्यापारः तृतीयत्वं कथमस्येति चेत् उच्यते महानसादौ
ते वह्निधूमयोः सहचारदर्शनात् व्याप्तिग्रहणं प्रथमं ततः पर्वतादौ धूमदर्शनं व्याप्यत्वेनेतत्समरणादितीय

तत्र घटः घटत्वमित्याकारकमतौ द्वितीयं न चात्र मानाभावः तदसत्त्वे सुप्रोत्थितस्यायं घटः इति विशिष्टज्ञानं न स्यात् विशेषणीभूतस्य
घटत्वस्याज्ञानात् विशेषणज्ञानं विना विशिष्टज्ञानानुदये तत्तस्य तद्धेतुत्वात् प्रत्यक्षं पुनः द्विविधं लौकिकालौकिक
भेदात् तत्र लौकिकप्रत्यक्षहेतुः सन्निकर्षः षड्विधः संयोगः संयुक्तसमवायः संयुक्तसमवेतसमवायः समवायः समवे
तसमवायः विशेषणविशेष्यभावश्चेति तत्र संयोगेन द्रव्यग्रहः अयं घटोऽस्तीति चक्षुरादेर्घटादिना संयोगसत्त्वात् एवं मनसा संयो
गेनात्मग्रहः अहमस्मीति संयुक्तसमवायेन गुणकर्मद्रव्यगतजातिग्रहः इह घटे रूपं चलनं द्रव्यत्वादिकमस्ति चक्षुरादिसं
के घटे रूपादीनां समवायात् संयुक्तसमवेतसमवायेन गुणकर्मजातिग्रहः घटगतरूपे रूपत्वादिकमस्ति घटगतचलने कर्मत्वा
दिकमस्तीति चक्षुरादिसंयुक्ते घटे समवेते रूपादिचलने च तत्र रूपत्वादेः कर्मत्वादेश्च समवायात् समवायेन शब्दग्रहः इ
तवीणायां शब्दोऽस्तीति कर्णशष्कुल्यवच्छिन्नः नभः श्रोत्रं तत्र शब्दस्य समवायात् समवेतसमवायेन शब्दत्वादिग्रहः इह
शब्दे शब्दत्वगुणत्वादिकमस्तीति श्रोत्रसमवेते शब्दे शब्दत्वादेः समवायात् विशेषणतया समवायाभावयोर्ग्रहः तद्यथा इह
विशेषणता द्विविधा इन्द्रियविशेषणता इन्द्रियसम्बद्धविशेषणता चेति तत्रेन्द्रियविशेषणतया शब्दसमवायस्य शब्दाभावस्य च ग्रहः
इह शब्दे समवायोऽस्ति इह शब्दो नास्तीति श्रोत्रे हि शब्दसमवायस्य शब्दाभावस्य च विशेषणत्वात् इन्द्रियसम्बद्धविशे
षणतया कपालादौ घटसमवायस्य घटाभावस्य च ग्रहः इह कपाले घटसमवायोऽस्ति इह भूतले घटो नास्तीति चक्षुरादिसंयु
क्ते कपाले घटसमवायस्य भूतले घटाभावस्य च विशेषणत्वात् समवायस्य प्रत्यक्षत्वं तु न्यायमते न वैशेषिकमते तु
समवायोऽतीन्द्रियः अलौकिकप्रत्यक्षहेतुः सन्निकर्षस्त्रिविधः सामान्यलक्षणा ज्ञानलक्षणा योगजधर्मश्चेति एत
त्रितयसन्निकर्षः षड्विधसहकारीति संप्रदायविदः मनस एव सहकारीति नव्यनैयायिकाः तत्र सामान्यं ज्ञायमा
नमेव स्वाश्रयाणां सन्निकर्षः ज्ञायमानघटत्वसन्निकर्षेण घटा इत्याकारकं सकलघटानां प्रत्यक्षं जायते ज्ञानलक्षणासन्निकर्षेण

त

ह्, ने॰, नं॰, कौ॰

यत्रेयं व्याप्तिः व्यतिरेकव्याप्तिश्च निगद्यते तदन्वयव्यतिरेकि यथा पर्वतो वह्निमान् धूमादित्यादि अत्र पर्वतः पक्षः तस्य वह्निमत्वे
साध्ये धूमादिति हेतुरस्ति न यत्र यत्र धूमस्तत्र तत्र वह्निर्यथा महानसादौ इत्यन्वयव्याप्तिः यत्र यत्र वह्न्यभावस्तत्र तत्र धूमाभा
वो यथा जलमहाह्रदादौ इति व्यतिरेकव्याप्तिरस्ति अन्वये साधनं व्याप्यं साध्यं व्यापकमिष्यते साध्याभावोऽन्यथा व्याप्यो व्यापकः
साधनात्ययः १ व्याप्यस्य वचनं पूर्वं व्यापकस्य ततः परं एवं परीक्षिता व्याप्तिः स्फुटीभवति तत्त्वतः २ तथा तांम मध्येऽन्वयव्य
तिरेकी सपंचरूपोपपन्न एव स साध्यं साधयतीति तानि पंचरूपाणि पक्षधर्मत्वं सपक्षे सत्त्वं विपक्षाद्व्यावृत्तिः अबाधितविषयत्वं
असत्प्रतिपक्षत्वं चेति पक्षताश्रयहेतुत्वं पक्षधर्मत्वं निश्चितसाध्यवान् सपक्षस्तत्र विद्यमानत्वं सपक्षे सत्त्वं निश्चितसा
ध्याभाववान् विपक्षस्तत्राविद्यमानत्वं विपक्षाद्व्यावृत्तिः प्रमाणान्तरेणाऽप्रमितसाध्याभावत्वं अबाधितविषयत्वं सा
ध्याभावसाधकहेत्वन्तरशून्यत्वमसत्प्रतिपक्षत्वं एतानि पंचरूपाणि वह्निसाधकधूमादावन्वयव्यतिरेकिणि विद्यन्ते के
वलान्वयिनि विपक्षाद्व्यावृत्तिर्नास्ति विपक्षाप्रसिद्धेः केवलव्यतिरेकिणि सपक्षे सत्त्वं नास्ति सपक्षाप्रसिद्धेः त्रिविधमप्य
हि नुमानं द्विविधं स्वार्थं परार्थं चेति स्वस्यैवानुमितिहेतुः स्वार्थं स्वयं धूमादग्निमनुमाय परं बोधयितुं पंचावयवोपेतमनुमा
नवाक्यं प्रयुंक्ते तत्परार्थं पंचावयवास्तु प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि तत्र पक्षे साध्यनिर्देशः प्रतिज्ञा यथा पर्वतो वह्नि प्र
6 मानिति पंचम्यन्तहेतुप्रतिपादकं वाक्यं हेतुरवयवः यथा धूमादिति व्याप्तिप्रतिपादकं वचनमुदाहरणं यथा यो यो धूमवान् स स व
ह्निमान् यथा महानस इति व्याप्तिः विशिष्टस्य हेतोः पक्षधर्मताप्रतिपादकं वचनमुपनयः यथा वह्निव्याप्यधूमवांश्चायमिति अबाधितत्वा
सत्प्रतिपक्षितत्वज्ञापकं वाक्यं निगमनं यथा तस्माद्वह्निमानिति तथा चायमित्युपनयस्य तस्मात्तथेति निगमनस्य शरीरमिति प्राचां
व्यतिरेकिणि प्रतिज्ञाहेतू तुल्यौ दृष्टान्तोदाहरणोपनयनिगमनानि भिद्यन्ते यथा जीवच्छरीरं सात्मकं प्राणादिमत्त्वादित्यत्र यत्सा
त्मकं न भवति तस्मान्न प्राणादिमत् यथा घटः न चेदं जीवच्छरीरं प्राणादिमन्न भवति तस्मान्न तथेति अथ हेत्वाभासाः
अनुमितितत्कारणान्यतरप्रतिबन्धक [illegible] हेतवो हेत्वाभासाः तेषामनैकान्तिकविरुद्धासत्प्रतिप

हराम

ततस्तत्रैव व्याप्यत्वेन धूमस्य परामर्शो वह्निव्याप्यधूमवानयमित्येवंरूपो जायते [illegible]नित्तनोपत्वं तस्येति तोयं लिंगज्ञानज
न्यं लिंगिज्ञानमनुमितिः यथा पर्वतादौ धूमज्ञानानंतरं पर्वतो वह्निमानीति ज्ञानं व्याप्तिपक्षधर्मतावल्लिंगं ननु केयं व्याप्तिरिति
चेत् उच्यते अव्यभिचरितः साध्यसामानाधिकरण्यं व्याप्तिः अस्ति चेदयं पर्वतो वह्निमान् धूमवत्त्वादित्यादि सद्धेतौ यत्र यत्र धूम
स्तत्र तत्र वह्निरिति नियमत्वात् अस्ति चेदयं पर्वतो धूमवान् वह्निमत्त्वादित्याद्यसद्धेतौ यत्र यत्र वह्निस्तत्र तत्र धूमसत्तानियमस्यास
त्वात् तप्तायःपिंडे वह्निसत्वेपि धूमासत्वात् व्यभिचारज्ञानविरहसहकृतं हेतुसाध्यसहचारदर्शनं व्याप्तिग्राहकं कथमेतदिति चेत् दृश्यं
हेतोः साध्याभाववद्वृत्तित्वं व्यभिचारः तद्ज्ञाने सति व्याप्तिग्रहाभावात् तदभावस्तत्र कारणं हेतुसाध्यसहचारदर्शनं तु अन्वयव्यति
रेकाभ्यां तत्र कारणं का पुनः पक्षधर्मता पक्षताश्रयवृत्तित्वं पक्षधर्मता पक्षता चानुमित्साविरहविशिष्टसाध्यनिश्चयाभावः अ
स्ति चेदं पर्वतादौ यदि अनुमित्साविरहविशिष्टसाध्यनिश्चयस्य तत्राभावात् पर्वतादौ साध्यनिश्चये सत्यपि सत्यां चानुमित्सायां प
र्वतो वह्निमान् धूमादित्यनुमानसंभवात् तत्र पक्षतासत्वं तदेव अनुमित्साविरहविशिष्टत्वे साध्यनिश्चयविरोधात् तथा चानुमित्सावि
रहविशिष्टसाध्यनिश्चयस्य पक्षस्य तत्राभावात् न दोषः तच्चानुमानं त्रिविधं केवलान्वयि केवलव्यतिरेकि अन्वयव्यतिरेकी चेति यत्रा
न्वयव्याप्तिरेवास्ति तत्केवलान्वयि यथा घटोऽभिधेयः प्रमेयत्वादिति अत्र घटः पक्षस्तस्याभिधेयत्वं साध्यं प्रमेयत्वं हेतुस्त
स्मिन् यत्र यत्र प्रमेयत्वं तत्र तत्राभिधेयत्वमित्याद्यन्वयव्याप्तिरेवास्ति न तु यत्र यत्र साध्याभावस्तत्र तत्र हेत्वभाव इति व्यतिरेकव्या
प्तिः अभिधेयत्वप्रमेयत्वयोः सर्वत्र सत्वात् साध्याभावादेरप्रसिद्धत्वात् यत्र व्यतिरेकव्याप्तिरेवास्ति तत्केवलव्यतिरेकी
यथा जीवच्छरीरं सात्मकं प्राणादिमत्त्वादित्यादि अत्र जीवच्छरीरं पक्षस्तस्य सात्मकं साध्यं प्राणादिमत्त्वं हेतुस्तस्मिन्
यत्र यत्र सात्मकत्वाभावस्तत्र तत्र प्राणादिमत्त्वाभावः यथा घटादौ इति व्यतिरेकव्याप्तिरेवास्ति न तु यत्र यत्र प्राणादिमत्त्वं त
त्र तत्र सात्मकत्वमित्यन्वयव्याप्तिः दृष्टान्ताभावात् जीवच्छरीरमात्रस्य पक्षत्वात् [illegible] यत्र च हेतुसाध्ययोर्व्याप्तिद्वयसत्वात्

स्य

राम
१

च्चत्व न कश्चपासिद्धः। यथा गगनारविंदं सुरभि अरविंदत्वात् सरोजारविंदवदिति अत्र च अरविंदे पक्षे गगनीयत्वं पक्षतावच्छे-
दकं नास्ति अरविंदत्वं हेतुराश्रयासिद्धः। एतद्ज्ञानं परामर्शप्रतिबंधकं अरविंदे गगनीयत्वं नास्तीति ज्ञाने सति सुरभित्वव्याप्यारविंद-
त्ववद्गगनारविंदमिति परामर्शासंभवात्। एतस्य अरविंदे गगनीयत्वाभावावगाहित्वात्। पक्षे हेत्वभावप्रतीतौ स्वरूपा-
सिद्धः। यथा ह्रदो द्रव्यं धूमादिति अत्र च पक्षे ह्रदे धूमस्याभावोऽस्तीति धूमो हेतुः स्वरूपासिद्धः। एतद्ज्ञानमपि परामर्शप्रतिबंधकं
ह्रदे धूमो नास्तीति ज्ञाने सति द्रव्यत्वव्याप्यधूमवान् ह्रद इति परामर्शासंभवात्। एतस्य ह्रदे धूमसत्वाभावावगाहित्वात्। व्याप्यत्वावच्छे-
दकाभाववान् हेतुर्व्याप्यत्वासिद्धः। यथा पर्वतो वह्निमान् कांचनमयधूमादिति अत्र च धूमे व्याप्यतावच्छेदकत्वेनाभिमतं कां- नाच
चनमयत्वं नास्तीति धूमो हेतुर्व्याप्यत्वासिद्धः। एतद्ज्ञानमपि परामर्शप्रतिबंधकं धूमे कांचनमयत्वं नास्तीति ज्ञाने सति वह्निव्या-
प्यकांचनमयधूमवान् पर्वत इति परामर्शासंभवात्। एतस्य धूमे कांचनमयत्वसत्वाभावावगाहित्वात्। साध्याभाववत्पक्षको बा-
वाधः प्रत्यक्षतः प्रमाणसापेक्ष्या धितः। यथा वह्निरनुष्णः पदार्थत्वात् जलवदिति अत्र च वह्नौ पक्षे अनुष्णत्वाभाव उष्णत्वस्य त्वगिंद्रियेण निश्चयात् पदार्थत्वं हे-
प्रत्यक्षात् तुर्बाधितः। एतद्ज्ञानं साक्षादनुमितिप्रतिबंधकं वह्नावनुष्णत्वं नास्तीति ज्ञाने सति वह्निरनुष्ण इत्यनुमितेरसंभवात्। तदभावे सो-
घटवत् प्र किंक निरोपयुक्तहेतुज्ञाने प्रतिबंधकत्वात् इति हेत्वाभासाः। ननूपाधेरपि हेतुदोषत्वात् सोपाधिकोऽपि हेत्वाभासोऽस्तीति
त्रऽनुवन कथं पंचैव ते इति चेन्न व्यभिचारादिज्ञानस्यैवोपाधिज्ञानस्यानुमितिं प्रति करणान्तरप्रतिबंधकताभावेनोपाधेर्हेतु-
हृपवत्व दोषत्वाभावात्। कथं तर्हि व्याप्तेरनुमानेनोपाधिदूषणमेतदिति चेत् उपाधिज्ञानस्य व्यभिचारज्ञानप्रयोजकत्वेन तत्र तदुपन्यासा-
मुपाधिः
८ त्। अथ कोऽयमुपाधिरिति चेदुच्यते साध्यव्यापकत्वे सति साधनाव्यापकोपाधिः। यथा पर्वतो धूमवान् वह्नि- राम
रित्यत्रार्द्रेंधनं भवति च तत्साध्यस्य धूमस्य व्यापकं यत्र यत्र धूमस्तत्र तत्रार्द्रेंधनमिति सत्वात्। भवति च साधनस्य १
वह्नेरव्यापकं यत्र वह्निस्तत्रार्द्रेंधनमिति असत्वात् तप्तायःपिंडे वह्निसत्वेऽप्यार्द्रेंधनाभावात्। एवं पारिभाषिकमु-

ति

तत्र सव्यभिचारो नैकान्तिकः स त्रिविधः साधारणोऽसाधारणोऽनुपसंहारी चेति तत्र सपक्षविपक्षवृत्तिः साधारणः यथा पर्वतो धूमवान् वह्नेरिति स
पक्षे महानसे विपक्षे तप्तायःपिंडे वर्तते साधारणः एतज्ज्ञानं च विपक्षे हेतोर्व्यभिचारविषयिकत्वाद्व्यभिचारज्ञानविधया व्या
प्तिग्रहप्रतिबंधकं व्यभिचारज्ञाने सति व्याप्तिग्रहानुदयस्य सर्वसिद्धत्वात् सपक्षविपक्षव्यावृत्तत्वे सति पक्षवृत्तिरसाधारणः यथा शब्दो नि
त्यः शब्दत्वादिति शब्दत्वं हि सपक्षान्नित्याद्विपक्षाच्चानित्याद्घटादेर्व्यावृत्तं पक्षे च शब्दे वर्तते इत्यसाधारणं एतज्ज्ञानं च कथमनुमितिप्रतिबंधकं क
थमिति चेत् इत्थं शब्दत्वं हि नान्वयी हेतुः दृष्टान्ताभावात् किन्तु व्यतिरेकि तथा च यो यतो व्यावृत्तः स स्वाश्रये तदभावं साधयति य
था धूमो वह्न्यभाववतो जलह्रदादेर्व्यावृत्तः स स्वाश्रयपर्वतादौ वह्न्यभावाभावं साधयति तथा शब्दत्वं नित्यत्ववतो गगनादेः सपक्षा
द्व्यावृत्तमिति स्वाश्रये शब्दे नित्यत्वाभावमनित्यत्वं साधयेत् एवं नित्यत्वाभाववतो घटादेर्विपक्षाद्व्यावृत्तमिति स्वाश्रये शब्दे नि ये
त्यत्वाभावाभावं नित्यत्वमपि साधयेत् न चैकत्र शब्दे नित्यत्वानित्यत्वयोः संभवः तयोर्विरोधात् तस्माच्छब्दत्वे असाधारणज्ञाने स
ति न साध्यानुमितिरिति वस्तु सर्वपक्षकोऽनुपसंहारी यथा सर्वमनित्यं प्रमेयत्वादिति अत्र सर्वस्यैव पक्षत्वात्सपक्षत्वेऽनुपसं
हारी एतज्ज्ञानमपि व्याप्तिग्रहप्रतिबंधकं सर्वस्य पक्षत्वे व्याप्तिग्राहकस्य सहचारदर्शनस्याभावेन सहचारनिश्चयाभावे सति व्याप्तिग्रहा गो
संभवात् साध्याभावव्याप्तो हेतुर्विरुद्धः यथायं गौरश्वत्वादिति अत्र गोत्वसाध्यकेऽश्वत्वहेतौ तत्र गोत्वाभाववृत्तित्वात् साध्याभावव्याप्तेः सत्त्वाद्विरुद्ध
हेतुर्विरुद्धः एतज्ज्ञानं च साक्षादनुमितिप्रतिबंधकं गोत्वाभावव्याप्याश्वत्ववत्ताज्ञाने सति गोत्वनिश्चयासंभवात् साध्याभावसाधक
हेत्वन्तरवृत्तिपक्षः सत्प्रतिपक्षः यथा पर्वतो वह्निमान् धूमात् महानसवत् पर्वतो वह्न्यभाववान् पाषाणमयत्वात् कुड्यवदिति अ
त्र च द्वयोरपि हेत्वोः परस्परसाध्याभावसाधकत्वात् सत्प्रतिपक्षत्वं एतज्ज्ञानं च साक्षादनुमितिप्रतिबंधकं वह्निव्याप्यधूमवान्
वह्न्यभावव्याप्यपाषाणमयत्ववांश्चायमिति द्विविधपरामर्शे सति एकस्मादप्यनुमितेरभावात् परस्परप्रतिबंधात् परामर्शप्रतिबंधकत्वा
न्न विषयबाधोऽसिद्धः स च त्रिविधः आश्रयासिद्धः स्वरूपासिद्धो व्याप्यत्वासिद्धश्चेति तत्र पक्षतावच्छेदकाभा

ना

[illegible]

रा. यां घोष इत्यत्र तीरोपस्थापकं गंगापदं शक्यसंबंधो लक्षणा यथा गंगापदशक्यप्रवाहसंबंधो यस्तीरे संयोगः।
को. गंगासंबंधो गंगापदलक्षणा वा तस्य च शक्यस्य आकांक्षा योग्यता सन्निधयः सहकारिणः यस्यपदस्य येन प
नै. देन विनाऽन्वयानुभवजनकत्वं नास्ति तस्य तदर्थेन पदेन समभिव्याहारात् आकांक्षा यथा घटमानयेत्यादौ का
रकपदस्य क्रियापदेन विना घटः कर्मेत्यन्वयानुभवजनकत्वाभावात् कारकपदस्य क्रियापदेन सहाकांक्षा
एवं क्रियापदस्य कारकपदेनापि सह बोध्या अतएव गौरश्वः पुरुषो हस्तीत्यादौ नान्वयबोधः आकांक्षाविरहात्
एकपदार्थे परपदार्थसंसर्गो योग्यता यथा पयसा सिंचतीत्यादौ पयः पदार्थे सेकस्य संसर्गस्य कार्यकारणभाव
लक्षणस्य सत्त्वात् योग्यता अतएव वह्निना सिंचतीत्यादौ नान्वयबोधः योग्यताविरहात् पदानामव्यवधानं सन्नि
न धिः यथा गामानयेत्यादौ पदद्वयमव्यवधानेनोच्चारणात् सन्निधिः अतएव एकैकशः प्रहरे प्रहरेऽसहोच्चारिते गाम
नयेत्यादौ नान्वयबोधः सन्निध्यभावात् सोऽयं शब्दस्त्रिविधः विधिनिषेधार्थवादभेदात् तत्र प्रवृत्तिपरं वाक्यं वि
धिः यथा ज्योतिष्टोमेन स्वर्गकामो यजेत आरुणकामस्तण्डुलं पचेत इत्यादि ज्योतिष्टोमनामको यागः स्वर्गस्ये
ष्टसाधनं तण्डुलकर्मकपाकः ओदनस्येष्टसाधनमित्युभयत्रावगम्यते यजेत पचेतेत्यादि विधिप्रत्ययेनेष्टसाधन
त्वोपस्थापनात् निवृत्तिपरं वाक्यं निषेधः यथा कलंजं न भक्षयेदित्यादिकं कलंजभक्षणमनिष्टविशेषसाधनमिति वाक्या
र्थः इष्टविरोधप्रतिपादकं वा यत्तु व्यतिरिक्तं तत्पावनत्वेनैव वाक्यतात्पर्यात् विधिनिषेधभिन्नः शब्दोऽर्थवादः यथा अग्नि
र्दिशो रूप अग्निर्हि मस्य मेधस्य जुहोति पुरंदरः इत्यादि सयावंशा यो लोके वेदे च समानः इयांस्तु विशेषः
प्रमाणान्तरविरुद्धार्थबोधको गुणवादः यथा आदित्यो यूप इत्यादि प्रमाणान्तरप्राप्तार्थबोधकोऽनुवादः यथा अग्निर्हिमस्य भेषजमित्यादि प्रमाणान्तरविरोधतत्प्राप्तिरहिता
र्थबोधको भूतार्थवादः यथा इन्द्रो वृत्राय वज्रमुदयच्छदित्यादि तदुक्तं विरोधे गुणवादः स्यादनुवादोऽवधारिते भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मतः इति ॥

॥ हिंसा धर्मसाधनं हिंसात्वात् क्रतुवाह्यहिंसावदित्यत्र निषिद्धत्वमुपाधिः भवति यत्र यत्र धर्मसाधनत्वसाध्यस्य
व्यापकं यत्र यत्राधर्मसाधनत्वं तत्र तत्र निषिद्धत्वमिति सत्वात् साधनं तु हिंसात्वस्याव्यापकं यत्र यत्र हिंसात्वं त
७ त्र तत्र निषिद्धत्वमित्यसत्वात् यज्ञीयहिंसायां हिंसात्वसत्वेपि निषिद्धत्वस्यासत्वात् एवं गर्भस्थो मित्रातनयः श्या
मो मित्रातनयत्वात् दृश्यमानमित्रातनयवदित्यत्र शाकपाकजत्वमुपाधिः न च दृश्यमानस्य काकादौ
सत्वेसाकपाकजत्वाभावात् साध्यव्यापकत्वं काकादिव्यावृत्तश्यामत्वस्यैवात्र साध्यत्वात् इत्यनुमाननिरू
पणं अथोपमानं निरूप्यते तत्रोपमितिकरणमुपमानं तच्च सादृश्यज्ञानात्मकं उपमितित्वं जातिः सा तु उपमिति
कथमिति प्रत्यक्षसिद्धेति चेदुच्यते गवयपदमजानन् कश्चिन्नागरिकः कश्चिद्वनेचरं कीदृशो गवयपदवाच्य इति
पृच्छति ततस्तेन गोसदृशो गवयपदवाच्य इत्युक्ते सति कदाचिद्वनं गतो गोसदृशं पिंडं पश्यन् प्रागुक्तातिदेश
वाक्यार्थं स्मृत्वा असौ गवयपदवाच्य इति प्रतिपद्यते सा उपमितिः अत्र गोसादृश्यज्ञानं करणं अतिदेशवाक्या
र्थस्मरणं व्यापारः इत्युपमाननिरूपणं अथ शब्दो निरूप्यते शाब्दप्रमाकरणं ज्ञानविषयः शब्दः यथा नदीती
रे पंचफलानि सन्तीत्यादिवाक्यार्थगोचरयथार्थज्ञानं शाब्दप्रमा अत्र पदज्ञानं करणं पदजन्यपदार्थोप म
स्थितिर्व्यापारः पदोपस्थितानां पदार्थानां मिथः संसर्गो वाक्यार्थः पदसमूहो वाक्यं अर्थवाचकं पदं तद्द्वि
धं मुख्यं गौणं चेति यत्पदं शक्त्या यमर्थमुपस्थापयति तत्तस्मिन्नर्थे मुख्यं यथा गोघटादिव्यक्तिमुपस्था
गोघटादिपदं अस्माच्छब्दादयमर्थो बोद्धव्य इत्याकारकोऽनादिसंकेतः शक्तिः यत्पदं लक्षणया यमर्थमु
पस्थापयति तत्तस्मिन्नर्थे गौणं लक्षणा कास्त्युच्यते यथा गंगा

कारणं द्विवलसामान्यवान् प्रत्यक्षलसात्मको वा द्वेषः सविधः दुःखविषयत्वेन साधनविषयश्च दुःखहेतुषु प्रतिद्वेषः खेदात्मा
त्रे कारणं सा धनद्वेषश्चेति दुःखिता धनानाने कारणं प्रयत्नत्वसामान्यवान् उत्साहरूपः प्रयत्नः स त्रिविधः प्रवृत्ति
निवृत्तिर्जीवनयोनिभेदात् चिकीर्षाजन्यो यत्नः प्रवृत्तिः द्वेषसाधनताज्ञानजन्यो यत्नो निवृत्तिः श्वासप्रश्वास
हेतुर्यत्नो जीवनयोनिः सर्वातीन्द्रियः बुद्ध्यादयः प्रयत्नान्ता आत्ममात्रसमवेताः तत्रेश्वरगता नित्याः जीवगता अनित्याः
आद्यपतनासमवायिकारणं गुरुत्वं तच्च जलभूमात्रवृत्ति आद्यस्यन्दनासमवायिकारणं द्रवत्वं तत् द्विविधं सांसि
द्धिकं नैमित्तिकं च अग्निसंयोगाजन्यद्रवत्वं सांसिद्धिकं तज्जलमात्रवृत्ति अग्निसंयोगजन्यद्रवत्वं नैमित्तिकं तत्पृ
थिव्यादित्रयवृत्ति घृतादिरूपपृथिव्यां तेजसि सुवर्णादिरूपे च वह्निसंयोगात् द्रवत्वोत्पत्तेः स्नेहत्वजातिमान् चिक्कणतारूपः स्नेहः
स च जलमात्रवृत्तिः चूर्णादिपिण्डीभावहेतुर्गुणः संस्कारस्त्रिविधः वेगो भावना स्थितिस्थापकश्च वेगस्तु स्पर्शवद्द्रव्यमात्रवृत्तिः परमाणुगता
नित्याः कार्यगता अनित्याः श्रोत्रग्राह्यो गुणः शब्दः स द्विविधः संयोगजो विभागजः शब्दजश्चेति भेदात् यथा भेर्यादिसंयोगात्
जः संयोगजः तत्र भेर्याकाशसंयोगः समवायिकारणं भेरीदण्डसंयोगो निमित्तकारणं वंशे पाट्यमाने चटचटाशब्दः स
विभागजः तत्र वंशदलाकाशविभागोऽसमवायिकारणं वंशदलद्वयविभागो निमित्तकारणं वीचीतरं
गन्यायेन कदम्बगोलकन्यायेन वा उत्पद्यमानो द्वितीयादिशब्दः शब्दजः तत्राद्यशब्दः समवायिकारणं
अनुकूलवातादिर्निमित्तकारणं पुनरपि शब्दो द्विविधः वर्णात्मको ध्वन्यात्मकश्चेति तालुव्यादिव्यापारप्रभवो वर्णा
त्मकः मृदङ्गादिप्रभवो ध्वनिः सर्वोऽपि शब्दः आकाशमात्रसमवेतः जीवात्मसमवेता बुद्धिः सुखदुःखेच्छाद्वेषप्रयत्नाः
अदृष्टाश्च संस्कारविशेषाश्च भावनाख्यस्य नवविशेषगुणा नान्यत्र वर्तन्ते इति ज्ञेयम् तत्र नाधिकरणत्वं नियमात् वि
विहितक्रियासाध्यो धर्मः निषिद्धक्रियासाध्योऽधर्मः एतौ जीवमात्रसमवेतौ अनुभवजन्या स्मृतिहेतुर्भावना संस्कारत्वजा

का

इति देहेऽप्युक्ते वा दिवाऽभोजिनो रात्रिभोजनमन्तरेण पीनत्वमनुपपन्नमिति ज्ञानानन्तरं देवदत्तो रात्रौ भुंक्ते २

२९ १८

किं विदेव लौकिकं वाक्यं प्रमाणं यत्प्रोक्तं वेदवाक्यं तु सर्वं मयि प्रमाणं परमाप्तेन भगवता कृतत्वादिति इति निरूपणं अर्थापत्तिस्तु
नुप्रमाणान्तरं पीनो देवदत्तो दिवा न भुंक्ते इति निर्णीते तस्य व्यतिरेकि साध्यत्वात् तथा हि देवदत्तो रात्रौ भुंक्ते दिवाभुंजा
नत्वे सति पीनत्वात् यस्तु रात्रौ न भुंक्ते स दिवाऽभुंजानत्वे सति पीनोऽपि न भवति यथा दिवा रात्रौ वाऽभोजी नि अर्थापत्तिरपि
व्यतिरेकि न ततः प्रमाणान्तरमिति घटो यत्र स्यात् भूतले घटाभावो गृह्यते अनुपलब्धिरभावो गृह्यते एवं स्वरूप एव ग्रहकारि
णोऽनुप्रमाणान्तरं प्रत्यक्षेणैवाभावग्रहोपपत्तेः अन्यथेह घटो नास्तीति निर्णयान्तरमिह घटाभावं साक्षात्करोमीति प्रतीत्य
नुपपत्तेः प्रमाणं स्वतो ग्राह्यं परतो वेति विचार्यते तत्र जलादिज्ञाने जाते तत्र स्वत एव यथार्थज्ञानत्वं
प्रामाण्यमवधार्यं जलं प्रवर्तते ज्ञानग्राहकेणैव प्रामाण्यस्यापि ग्रहणात् प्रामाण्यस्य यावद् ज्ञानग्राहकसामग्रीग्राह्यत्वं स्वतस्त्वं
परगमात् इति मीमांसकाः तन्न स्वत एव प्रामाण्यग्रहे ज्ञानग्रहणानन्तरं विज्ञाते जलज्ञाने प्रमाणं न वेति प्रामाण्यसंशयो
न स्यात् निश्चिते संशयायोगात् संशयश्च ज्ञानग्रहे पि न वाच्य ज्ञानग्रहे तेन धर्मिकप्रामाण्यं तत
अनुमानतः इमां कोटिं संशयानुपपत्तेः संशयस्य धर्मिज्ञानसापेक्षत्वात् नहि धर्मिण्यनिश्चिते धर्मिज्ञाने संशयो भवति
ति संशयो भवति तस्मात् ज्ञाने परत एव प्रामाण्यमवधार्यते तथा हि अनभ्यासदशापन्ने जलादिज्ञाने जाते तत्र प्रामाण्य
संशये सत्यपि पुरुषः प्रवर्तते ततो जलप्राप्तौ सत्यां जातं मे जलज्ञानं प्रमाणं समर्थप्रवृत्तिजनकत्वात् यत्प्रमा भवति तत्स
मर्थप्रवृत्तिजनकं न भवति यथा जलभ्रमः इति व्यतिरेकेणानुमानेन प्रामाण्यं निश्चीयते अभ्यासदशापन्ने
जलादिज्ञाने पुनः एवमपि अन्यथासिद्धं प्रामाण्यमवधार्यते तत्रैव लिङ्गीभावादिजलज्ञानप्रमा समर्थप्रवृत्तिजनकजाती
यत्वात् आप्तजलज्ञानवदिति धर्मप्रमाणं वेद अथ धर्मप्रमाणं वेदः इच्छा सामान्यवतीत्वं कर्तव्यविधेयत्वं
यतीत्वात् अनुपजलज्ञानवदिति तदनिष्टानुबन्धि कारणतामात्रं कारणतामात्रं फलं तदभावनेतौ
यतिविषयतावेदनीयत्वं

वेऽन्योन्याभावः स च घटः पटो नेत्यादिप्रत्ययप्रसिद्धः अन्योऽन्याभावः संसर्गाभावः स त्रिविधः प्रागभावः प्रध्वंसाभा
वोऽत्यन्ताभावश्चेति उत्पत्तेः प्राक् समवायिकारणे कार्यस्य संसर्गाभावः प्रागभावः स च इह कपाले घटो भविष्य
तीति प्रत्ययसिद्धः उत्पत्त्यनन्तरं समवायिकारणे कार्यस्य संसर्गाभावः प्रध्वंसाभावः स चेह कपाले घटो ध्व
स्तः इति प्रत्ययसिद्धः त्रैकालिकसंसर्गाभावोऽत्यन्ताभावः स चेह भूतले घटो नास्तीति प्रत्ययसिद्धः एव
मन्येषामवान्तरभावः यथान्धकारस्यालोकाभावे यत्रालोको नास्ति तत्रान्धकारव्यवहारात् लक्षण
दोषाणामव्याप्त्यतिव्याप्त्यसम्भवानां हेत्वाभासेष्वन्तर्भावः लक्ष्यैकदेशे लक्षणस्यावर्तनमव्याप्तिः य
था शिखावत्त्ववान् ब्राह्मण इत्यस्य संन्यासिन्यव्याप्तिः तस्य शिखावत्त्वाभावात् अलक्ष्ये लक्षणगमनम
तिव्याप्तिः यथा मनुष्यो ब्राह्मण इति लक्षणस्य शूद्रेऽतिव्याप्तिः तस्यापि मनुष्यत्वात् लक्ष्ये क्वापि लक्षणस्यावर्त
नमसंभवः यथा शृङ्गदण्डवान् ब्राह्मण इति लक्षणस्यासंभवः कस्यापि ब्राह्मणस्य शृङ्गादण्डाभावात् एतद्दोष
रहितं लक्षणं विदुः शुद्धमानादिजन्यत्वात् ब्राह्मण इति विरुद्धश्चैव घटकर्माद्यकारकत्वं इत्यलं प्रप
ञ्चेन सर्वेषां पदार्थानामुद्देशलक्षणे कृते बालानुपयोगात् परीक्षा न कृता लक्ष्यतावच्छेदकमात्रेण लक्ष्यस्य की
र्तनमुद्देशः असाधारणधर्मो लक्षणं उद्देशलक्षणाभ्यामुपपन्नमनुपपन्नं वेति फलको विचारः परीक्षा न्य
ननु निःप्रयोजनं तत्त्वार्थनिरूपणं जन्यपदार्थतत्त्वज्ञानस्य दुःखाभावसाधनेतरत्वेन प्रयो तम
जनत्वाभावादिति चेन्न पदार्थतत्त्वज्ञानस्यात्मतत्त्वज्ञानद्वारा मोक्षसाधनत्वात् आत्यन्तिकदुःखध्वं १०
सो मोक्षः स च स्वसमानाधिकरणदुःखप्रागभावासमानकालीनदुःखध्वंसः संस्कारकालीनदुःखध्वं

त्वप्रमात्वं तद्भिन्नप्रमा सा द्विविधस्वप्नघटादि

तिमान् संस्कारः स त्रिविधः वेगः स्थितिस्थापको भावना चेति वेगत्वजातिमान् वेगः समूर्तद्रव्यमात्रसमवेतः अन्यथाकृतस्य पूर्वा-
वस्थापादकः संस्कारः स्थितिस्थापकः स च पृथिव्यादिचतुष्टयवृत्तिः आकृष्टस्य शाखादेः पुनस्तत्स्थानस्थितिं जनयति
इत्येषो क्रियाजन्यो वेगजन्यः क्रियानाशेऽपि च पूर्वानुभवजन्यः स्मृतिहेतुः संस्कारो भावना नाम जीवमात्रवृत्तिः त्रिविधः संस्कारो
ऽनेन स्फुट एव इति गुणनिरूपणं ऊर्ध्वदेशसंयोगहेतुः कर्म उत्क्षेपणं अधोदेशसंयोगहेतुः कर्म अपक्षेपणं स्वसन्निकृष्टसं-
योगहेतुः कर्म आकुञ्चनं स्वविप्रकृष्टसंयोगहेतुः कर्म प्रसारणं गमनं पञ्चविधमपि कर्म मूर्तद्रव्यमात्रसमवेतम् अनि-
त्यमेव उत्तरसंयोगात् क्वचिद्विभागाद्वा नाशात् नश्यति इति कर्मनिरूपणं अथ केन प्रकारेणेति सामान्यं परं यथा सत्
त्वा ताद्रव्यत्वं किञ्चिदल्पदेशवृत्तित्वेनैतत्सामान्यापेक्षया घटत्वादिकं देशवृत्तित्वात् अपरं इति सामान्यमपरं परापरं यथा द्रव्यत्व-
गुणत्वकर्मत्वादि सत्तापेक्षया अल्पदेशवृत्तित्वात् उक्तः सामान्यं द्विविधं जातिरूपमुपाधिरूपं च सत्तात्वसमवेतं सामा-
न्यं जातिः यथा सत्ताद्रव्यत्वादि परं परा संवेद्य सामान्यमुपाधिः यथा प्रमेयत्वपटत्वादि दण्डत्वकुण्डलत्वादि अत्र
मात्वमेव किं परं परासंवेद्ये न घटादिनिष्ठत्वमेव भिन्नत्वात् इति सामान्यनिरूपणम् नित्यद्रव्यवृत्तयो विशेषाः सामा-
मान्यस्य च विशेषवत्ता विभागाभावात् सामान्यलक्षणमेव पूर्वोक्तमवधेयम् तु विशेषानभ्युपगमे समानजातिगुण-
क्रियावतां परमाणूनां परस्परव्यावृत्तिबुद्धिर्न स्यात् तत्र व्यावर्तको योगिनोऽपि तथा परमाणुजातौ न सङ्करः स्यादि-
त्येवं द्रव्ययोः संयोगस्याप्युतसिद्धयोः समवायः अयुतसिद्धयोः यथा ये द्वयोर्मध्ये एकमविनश्यदपराश्रितमेवावति-
ष्ठते तावयुतसिद्धौ एतौ यथा च विधौ अवयवावयविनौ गुणगुणिनौ क्रियाक्रियावन्तौ जातिव्यक्ती विशेषनित्यद्रव्ये क्रिया
चेति अवयव्यास्यो हि अवयवाश्रित एवावतिष्ठते अवयवा हि नाशान्तरं विना पृथक्तन्तुरूपा-
मात्रे निराश्रिता एवावतिष्ठन्ते इति विशेषसमवायौ निरूपितौ तादात्म्यसंबन्धावच्छिन्नप्रतियोगिताकोऽभा-

ना० २३
[illegible] देवतामंत्रं जपकारिसं तद्दशांश हवनं मंत्रेण चरुणा तद्दशांशं स्यात्प्रति
तद्दशांशमार्जनं च [illegible] कारयेद्द्विजो॥ [illegible]
[illegible] ओं अद्यामुकगोत्रोऽहममुकशर्माऽहं अद्यामुकगो
त्रस्य अमुकप्रेतस्य देहोद्धरणकामो नारायणबलिपूजनं करिष्ये।
द्रा ५ ॐ पद्मोपरि [illegible] देवतामंत्रेण [illegible] तत्तद्दशांश हवनं च
[illegible] तद्दशांश तर्पणं तद्दशांशमार्जनं चाहं करिष्ये॥ हवना
दिकं कृत्वा पश्चात् बलिदानम्॥ तत्क्रमः पूर्वस्यां दिशि इं
द्राय नमः ओं इन्द्र इमं दधिमाषबलिं भक्तं समांसं कुटुंबं सपरिवा
रं रक्ष रक्ष आयुकर्ता क्षेमकर्ता कल्याणकर्ता वरदो भव॥ एवं अग्नि
कोणे अग्नये नमः॥ दक्षिणस्यां यमाय नमः॥ नैर्ऋत्यकोणे निर्ऋ
तये नमः॥ पश्चिमे वरुणाय नमः॥ वायव्यकोणे वायवे नमः॥ उत्तरे

त्वा इति मंत्रेण एकां दशावलिं जले क्षिपेत्॥११॥ ओं विष्णोः कर्माणि प
श्यत। यतो व्रतानि पस्पशे इन्द्रस्य [illegible]ज्यः सखा इति मंत्रेण दा
दशावलिं जले क्षिपेत्॥१२॥ ततः स्वस्तिवाचनं कृत्वा रुद्रा॥
ध्यायं पठेत्॥ अथ पक्षपद्धते शुभे मासे ... पक्षे ... अद्यामुक
गोत्रस्य पितुरमुकप्रेतस्य देहतो दुरणकामोन्नराव...
त्वेन प्रा... एकादशाहे ... द्वादशे ... तेन
... हवनं ... स्वर्गे ... ओं ...
पक्वतान्नं पुष्प फल दक्षिणा ... मुकामुक ...
मुकामुक शर्मणे ... इति प्रतिवचनं॥
अथ चरुसंकल्पः॥ ओं अद्यामुक गोत्रस्य पितुरमुकप्रेतस्य देहतो दु
रणकामो नारा ... गरपंचप्र

जपदक्षिणां सं । ... सर्वकल्पो नाम यथावलिः क्रमेण ॥ ... अमुकगो

कल्पं कुर्वीत ॥ देशकालौ स्मृत्वा अमुकगोत्रोहं अमुकशर्माहं ब्राह्म
णद्वाराकारितस्य श्रीब्रह्मगायत्रीमंत्रस्य सपादलक्षसंख्या
कजपस्य सांगतासिद्ध्यर्थं दक्षिणाद्रव्यं यथानामगोत्रेभ्यो
[illegible] ब्राह्मणेभ्यो विभज्य दातुमहमुत्सृजे ॥ अथ पंचघ
टदानम् ॥ तत्र क्रमः अद्यामुकगोत्रस्यामुकप्रेतस्य देहोद्धर
णकामः इमं ब्रह्मणः घटं रंजितं प्रतिमासहितं सोपस्करं विष्णु
प्रसन्नार्थं यथानामगोत्राय ब्राह्मणाय तुभ्यमहं संप्रददे ॥ अद्यामु
कगोत्रस्य पितुरमुकप्रेतस्य देहोद्धरणकामः रुद्रस्य विष्णुप्रीतिमासहि
तं इमं घटं सोपस्करं विष्णुप्रीतये यथाना० तुभ्य० ॥ अद्यामुकगो

... दीक्षा संकल्पः पूर्ववत् सर्वं कृत्वा ब्राह्मणद्वाराकारित

२४

ग्प्रारका चराग चार वत्तीस गां करक वात ना ग्प्रार सव प ...

कुवेराय नमः॥ ईशाने मध्ये देवाय नमः॥ ईशान पूर्व मध्ये ब्रह्मणे नमः॥
नैऋत्य पश्चिम मध्ये अनंताय नमः॥ अथ क्षेत्रपाल पूजा॥ करकलित
कपालः कुंडली दंडपाणी स्तरुण तिमिर नीलव्याल यज्ञोपवीती क्रतु
समय सपर्या विघ्न विच्छेद हेतु जयति वटुकनाथः सिद्धिदः सा
धकानाम्॥१॥ ओं क्षेत्रपाल इमं दधिमाषवलिं भद्र तं रमं
सकुटुंवं ससपरिवारं रत्न रम्या पुकती देमकतीक स्याण
कर्ता वरदो भव॥ इति ... संकल्पः॥ अद्यामुके
... पितुर्मातु ... देतो ... कामो ... कर्म सां
... सिध्यर्थं ... दाने ... फल ... वांछीनी दक्षिणा
... नाम ... दास्ये

एवं तं ... लनी व ...

पति दैवतं यथा नाम गोत्राय प्रा लग्ना पदातु मदमुत्सृजेत्।। अ

थ पूर्णाहुतिं संपूज्य दद्यादनेन मंत्रेण।। ॐ मूर्द्धानं दिवो

अरतिं पृथिव्या वैश्वानरमृतजातमग्निं कविं सम्राजम

तिथिं जनानामासन्ना पात्रं जनयंत देवाः स्वाहा [redacted]

[redacted] स पूर्णा व ... इति पूर्णाहुतिं

[redacted] छायापात्रं दद्यात् तद्यथा अमुक गोत्रोऽहं अमुककरणमीहे अस्तमस्

तु विनाशाय दीर्घायु प्राप्त्यर्थे इदं छायापात्रं घृतसमन्वितं यथा०।।

ततः अभिषेकं आकाशे ॐ स्वादिना।। ततः तिलकम् [redacted]

[redacted] प्रार्थ[redacted] अतसीपुष्पसंकाशं पीतवासं जनार्दनं ये नमस्यंति

जो विंदं न ते बाविद्यते भयम्।। अनादिनिधनो देवः शंखचक्रग

ऊरोगृहीता एवा प्याप्या दानं जो दानं वादद्यात् ६

त्रस्य० इमं घटं ताम्र [illegible] रुद्रप्रतिमासहितं रुद्रप्रसन्नार्थं वधाना०
तुभ्य० ॥ अद्यामुकजो त्रस्य० इमं घटं पद्मलोहप्रतिमासहितं ।
सोपस्करं पद्मप्रसन्नार्थं वधाना० तुभ्य० ततोऽपसव्यं ॥ अद्यामु
कजो त्रस्यामुकप्रेतस्यपदेकोद्धरणकामः इमं घटं सीसप्रतिमा
घलंकृतं तत्पुरुषप्रसन्नार्थं पधाना० तुभ्य० ततः पंच घट
नां दानप्रतिष्ठा संकल्पं कुर्वीत ॥ ततः पंच घटस्थापिता मान्नदान
संकल्पं कुर्वीत ॥ अथाचार्याय दक्षिणादानं दद्यात [illegible] ॥
अथ पूर्णपात्रसंकल्पः कृतैतन्नारायणबलिहोमकर्मणो कृता
कृतावेक्षणरूपत्र कर्मप्रतिष्ठार्थं इदं तंडुलपूर्णपात्रं प्रजा
पति दैवतं ब्रा... मं ... दद्ये ६

अथ कृतै तस चैव यानी ध्यान प्रति ... ता स्मता

ना० २६

तिरेता ड़ोरि के नाले न गज ५ अलभ्यु॥ हवनन्दिन की सामग्री॥ ५
पञ्च रत्नी स्वर्ण रजित ताम्र लोह मयी सीसमयी॥ वस्त्र ५ रत्न श्वे
त पीत स्याम हरित॥ ५ अन्न तंडुल गोधूम माष मुंग ति
ल॥ ५ कलश ५ सराई॥ १ [illegible] श्वेत वस्त्र॥ और हो मु
के आटे को गो के दुग्ध मा गुंद कर के घृत मापो ले एसा ती
२५ आध सेर आटे की॥ १ सेर तंडुल चूर्ण॥ १ श्रीफल पूर्णा
हुति के निमित॥ २५ सपारी [illegible] इलाचि वडी॥ मेवा ३ छटांक
इंद्रयव भोजपत्र॥ २ पान॥ जो दुग्ध जो घृत मधु दधि॥
२० सेर तिल १० सेर यव ५ सेर तंडुल ७॥ सेर शकर ८ सेर घी २६

पहक चातोलाते

अथ ... विसर्जनम्॥ ... ॥ अथ ... विसर्जनम्॥ ... दामीतिपठेत्

धरा॰ मंत्रय पुष्पांजलि का दोषेतमो दान दो भव २ प्राणि व स्था विसर्जये॥
त इति श्री दालभ्य ... तेधर्मशास्त्रे नारायणबलिःकर्म समाप्तम्॥
लिखितं पुस्तकं मोदकाख्य नगरे मधुसूदनदासेन॥ शुभम्
सम्वत् १९५१ का॰ शु॰ ११ गुरौ शुभमस्तु वात॥ अथ साम...
समग्रेण सह वर्तमानः सामग्री॥ प्रथम वस्त्र सामग्री॥ लोटे नग
४ धोति नग ४ आसन नग ४ गोमुखी ४ माला कमलकी ४ पवीत्री ४
जनेऊ ४ चंदन स्वेतको गटी नग ४ साके ४ सुपारी नग ... सर्वौ
धी अमावे सतावर कुंकु केशर सेर वारी और २ नालियर ॥१ क
लश मट्टीका ६ सरामी १ दिवा अष्ट पत्रं आम्र पल्लव दूर्वी
पसे ... टके ... मुद्रिका अक्षत पुष्प धूप नैवेद्य जंजा जलके ...

अथ सामग्री साम ... सामग्री

२९

